# M.A. 1st Semester Examination, 2024

## SANSKRIT

PAPER—SAN-101

*Full Marks* : 50

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

प्रश्नानां सर्वेषामुत्तरं संस्कृतेनैव प्रदेयम्

1. यथानिर्देशमुत्तरं दीयताम्–

(क) ऋग्वेदीयपुरुषसूक्तस्य दार्शनिकतत्त्वं प्रतिपाद्यताम् । 10

अथवा

शिवसङ्कल्पसूक्तसारः समासेन समुपस्थाप्यताम्

( *Turn Over* )

(*ख*) शुन:शेपोपाख्यानं कस्मिन ब्राह्मणभागान्तर्गतम् ? शुन:शेपः कः ? इपाख्यानमिदं विलिख्य शुन:शेपोपाख्यानस्य वैशिष्ट्यं प्रतिपाद्यताम् । 10

*अथवा*

अधस्तनयोः द्वयोः व्याख्यानं करणीयम् — 5 × 2

(*i*) ऋणमस्मिन् संनयत्यमृतत्वं गच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेजीवतो मुखम् ।

(*ii*) कलिः शयानो भवति, संजिहानस्तु द्वापरः ।
उत्तिष्ठंस्त्रेता भवति, कृतं सम्पद्यते चरंश्चरैवेति ।।

**2.** यथानिर्देशमुत्तरं दीयताम् —

(*क*) अधो निर्दिष्टेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या कार्या — 5 × 2

(*i*) यो हत्वाहिमरिणात् सप्त सिन्धून्
यो गा उदाजदपधा बलस्य ।
यो अश्मनोरन्तरग्निं जजान
संवृक् समत्सु स जनास इन्द्रः ।।

(*ii*) न मृत्युरासीदमृतं न तर्हि
न रात्र्या अह्न आसीत् प्रकेतः ।
आनीदवातं स्वधया तदेकं
तस्माद्धान्यन्न परः किञ्चनास ॥

(*iii*) कालो अश्वो वहति सप्तरश्मिः
सहस्राक्षो अजरो भूरिरेताः ।
तमारोहन्ति कवयो विपश्चित-
स्तस्य चक्रा भुवनानि विश्वा ॥

(*iv*) असंबाधं मध्यतो मानवानां
यस्याः उद्वतः प्रवतः समं बहु ।
नानावीर्या ओषधीर्या बिभर्ति
पृथिवी नः प्रथतां राध्यतां नः ॥

(ख) 'अग्निमीळे' इति सूक्तं प्रातरनुवाके आग्नेये क्रतौ विनियुक्तम्— इति भाष्यवचनस्याशयः स्फुटीक्रियताम् ।

5 × 1

(*ग*) यथेच्छं द्वयोः पदयोः सूत्रोल्लेखपूर्वकं स्वराः साध्यन्ताम्– $2\frac{1}{2} \times 2$

(*i*) अग्निम्

(*ii*) वक्षति

(*iii*) यज्ञस्य

(*iv*) अध्वरम् ।

**[ Internal Assessment – 10 Marks ]**